# श्रद्धाञ्जलिं सादरमर्पयामि

**रहसविहारी द्विवेदी**

संस्कृतं वाङ्मयं चार्षसत्संस्कृतिं
पोषयन् प्रीणयन् प्रेरयन् पाठयन्।
सात्त्विकं जीवनं सद्विचारं श्रयन्
स्वाभिमानी स्वतन्त्रः सुधी रामजीः।।1।।

द्वा सुपर्णेत्युपन्यासो राष्ट्रसांस्कृतिको निधिः।
कैकेयीविजयं चेति ग्रन्थानां लेखकः कविः।।2।।

धृतिक्षमाऽदितः प्रोक्ता मनोः कर्तव्यबोधकाः।
नृधर्माःसर्वग्रन्थेषु प्रायशः समुदीरिताः।।3।।

संस्कृतावितिहासे च हिन्द्यामप्यनुभाः कृताः।
पञ्चाशदधिका ग्रन्था राजन्ते चास्य विश्रुताः।।4।।

शोधपत्रैर्विशेषाङ्कैः सागरिका च पत्रिका।
चत्वारिंशत्तमं वर्षं यावत्सम्पादिता मुदा।।5।।

पाठ्यक्रमेऽद्य सम्बद्धा ग्रन्थास्तेन विनिर्मिताः।
राष्ट्रसंस्कारसंयुक्ता मनोर्धर्मप्रवर्तकाः।।6।।

शोधलेखाः शतं चास्य काव्ये शास्त्रे च मौलिकाः।
पत्रिकास्वद्य राजन्ते बहुधा सम्प्रकाशिता।।7।।

हिन्द्यां संस्कृतभाषायामाङ्ग्ल्यां च निपुणो महान्।
आचार्योऽयं प्रशस्तोऽभूच्छात्रा अप्यस्य तादृशाः।।8।।

आचार्याः—क्षेत्रवासी च कुसुमाख्या च भूरिया।
इन्द्रमोहनसिंहश्च रामगोपालमिश्रकः।।9।।

कुलपतिश्च संस्थाने कविः श्रेष्ठश्च लेखकः।
राधावल्लभनामाऽयं त्रिपाठी काव्यशास्त्रकृत्।।10।।

अन्ताराष्ट्रियविद्वत्सु गण्यते लोकविश्रुतः।
रामजीछात्रमालायां सुमेरुरिव राजते।।11।।
शोधेऽथ शोधपत्रे च लेखने प्रेरको मम।
उपाध्यायमहाभागो मदीयो मार्गदर्शकः।।12।।
अधीतिबोधाऽचरण प्रचारै–
राजीवनं संस्कृतिरक्षकाय।
श्रीरामजीत्यार्षगुणाय तस्मै
श्रद्धाञ्जलिं सादरमर्पयामि।।13।।

–––000–––